International Journal of Sanskrit Research 2018; 4(2): 48-49

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(2): 48-49
© 2018 IJSR
www.anantaajournal.com
Received: 16-01-2018
Accepted: 20-02-2018

डॉ० त्रिभुवन नारायण मिश्रः
पत्रालयश्च– भीड.हा समस्तीपुर,
बिहार, भारत

Corresponding Author:
डॉ० त्रिभुवन नारायण मिश्रः
पत्रालयश्च– भीड.हा समस्तीपुर,
बिहार, भारत

# आचार्याभिनवमते सान्तरसस्य दार्शनिक–समीक्षा

डॉ० त्रिभुवन नारायण मिश्रः

**प्रस्तावना**

शान्तस्य साधकाः सत्त्वज्ञानस्थितिं प्राप्ता अपि संसारे परदुःख–दुखितमनसो दृश्यन्ते। अतो नास्ति शान्तो रस इति पूर्वपक्षाभिप्रायः। एवं पूर्वपक्षं समुपस्थाप्य शान्तरसं प्रस्थापयतयाऽभिवगुप्तपादेन प्रतिपादितम्–इह लोक यथा धर्मार्थकामः पुरूषार्थास्तथैव मोक्षोऽपि पुरूषार्थः शास्त्रादौ प्राधान्येनोपायतः प्रतिपाद्यते। यथा च शृङ्गारादिरूपत्वेन रसत्वं नीयन्ते तथैव मोक्षरूपपरमुरूषार्थोचिता चित्तवृत्तिः सहृदयान् प्रति शान्तरूपतया कथं रसत्वं नानीयेत ? ततश्च मोक्षरूपपुमर्थसाधक चित्तवृत्तिरूपस्थायिभावः शान्तरसत्वेन आस्वाद्यत एव नाट्ये इति।

अभिनवभारतीमण्डिते ''नाट्यशास्त्रे'' शान्तरसस्वरूपन्त्वेवमुलभ्यते–

''अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः। स तु तत्त्वज्ञान वैराग्रूाशयशुद्धयादिभिर्विभावैः समुत्पद्यते। तस्य यम–नियमाध्यात्मध्यान– धारणोपासन सर्वभूतदयालिङ्गग्रहणादिभि नुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणश्चास्य निर्वे–स्मृति–धृति–शौच–स्तम्भ–रोमा–रामोञ्चादयः। अत्रार्याः श्लोकाश्च भवन्ति–

मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
नैःश्रेयसोपदिष्टः शान्तरसो नाम संभवति।।
बुद्धीन्द्रिय–कर्मेन्द्रिय–संरोधाध्यात्म–संस्थितोपेतः।
सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः।।
यत्र न दुःखं न सुखं न द्वेषो नापि मत्सरः।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः।।
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते।।
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्मिमित्तापाये च शान्त एवोपलीयते।।
एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विता [1]।।'' इति।

''नाट्यशास्त्रे'' शान्तरसमनङ्गीकुर्वतां मतेन यद्येतस्यांषस्य प्रक्षिप्तत्वं प्रथमाध्याये मुनिना प्रतिपादिते–

''क्वचिद्धर्मः क्वचित्क्रीडा क्वचिदर्थः क्वचिच्छमः [2]''

ठति पुरूषार्थचतुष्टयरूपे नाट्यप्रयोजने परमप्रयोजनस्य मोक्षस्यैव प्रयोजकीभूतस्य शान्तररसस्यप्रतिपादनात् तदंशे विकलतया पुरूषार्थचतुष्टयप्रतिपादनमसंगतं स्यात्।

शान्तरस–विरोधिनां मतं पूर्वपक्षतया प्रतिपादयताऽभिवगुप्तपादेन तत्र प्रकरणे प्रोक्तम्–

''एतदपरे न सहन्ते। (1) शम–शान्तयोः पर्यायत्वात्। (2) एकोनपञ्चाशद्भावा इति संख्यात्यागाच्चा। (3) किञ्च विभावा ऋतुमाल्यादयस्तत्मसमनन्तरभाविनि शृङ्गरादावनुसन्धीयते इति युक्तम्। तपोऽध्ययनादयस्तु न शान्तस्य शमस्य हेतवः। तत्त्वज्ञानस्याप्यनन्तरहेतव इति चेत्, पूर्वोदिततत्त्वज्ञानेऽपि तर्हि प्रयोज्यतेति तपोऽध्ययनादीनां शमविभावता परित्यक्ता स्यात्। कामाद्यभावोऽपि नानुभावः शान्तविपक्षादव्यावृत्तेः, अगमकत्वात्। (4) प्रयोगासमवायित्वाच्च। न हि चेष्टाव्युपरमः प्रयोगयोग्याः। सुप्तमोहादयोऽपि निःश्वासोच्छ्वास–पतन–भूशयनादिभि श्चेष्टाभिरिवानुभाव्यन्ते। (५) धृतिप्रभृतिरपि प्राप्तविषयोपभोगः कथं शान्ते स्यात्। (८) न चाकिञ्चित्करत्वमात्रेण तत्त्वज्ञानोपायो व्युत्पाद्यते। (७) विनेयाश्चैते परदःखदुःखितमनसो दृश्यन्ते सम्यदर्शनसमावस्थां प्राप्ताः अपि तु संसारे। तत्र न शान्तो रस इति [3]।''

अयमाशयोऽत्र पूर्वपक्षिणाम्–

(१) शान्तस्य शमस्थायिभावत्वे शम–शानतयोर्भेदेन तयोः समानार्थकतया पर्यायत्वकथनमसंगतं स्यात्।

(२) मुनिना (अष्टौ स्थायिनः + अष्टौ सात्त्विकाः + त्रयस्त्रिंशद् व्यभिचारिण इति) एकोनपञ्चाशद्भावाः प्रतिपादिताः। शमस्थायिभावस्य शान्तस्य स्वीकारे पञ्चाशद्भावाः स्युः। एवञ्च संख्या–नियम–त्यागात्रास्ति शमः तत्स्थायि शान्तश्च।

(३) अपरं च ऋतुमाल्यादयो विभावास्तत्समनन्तरभाविनि शृड्गारादिरसे कारणतया प्रतीयन्ते, परन्तु तपःस्वाध्यायादयस्तत्समनन्तरभाविनि शमे शान्ते वा कारणत्वेन न प्रतीयनते। अतस्तपःस्वाध्यायादयो न शान्तस्य विभावाः। एवमेव च कामाद्यभावोऽपि न शानस्यानुभावः, शान्ताद् भिन्ने वीरादावपि कामाद्यभावस्य च शान्तस्यानुभावत्वम्। यदि कामाद्यभावः शान्तस्यानुभावः स्यात् तर्हि कामाद्यभावस्य शान्तस्य कार्यतया यत्र यत्र शान्तस्तत्र तत्रैव कामाद्यभाव इत्यन्वयव्यतिरेकनियमो भवेत्। किन्तु शान्तस्थले कामाद्यभावस्य विद्यमानत्वेन अन्वयसत्त्वेऽपि शान्त–भिन्ने वीरादावपि तस्य सत्त्वाद् व्यतिरेकाभावः। अतः कामाद्यभावस्य शान्तानुभावत्वं न घटते।

(४) समस्तव्यापार– प्रविलयरूपस्य शमस्याभिनयायोग्यत्वात्र नाट्ये शान्तरसः शक्यते प्रयोक्तुम्। सुप्तमोहादयोऽपि निःश्वासादिचेष्टाभिरनुभाव्यन्ते। किन्तु चेष्टा–व्युपरमरूपस्य शान्तस्याभिनयासंभवात् नास्ति शान्तो रसः।

(५) विषवोपभोगानन्तरं जायमानस्य धृत्यादेर्व्यभिचारित्वमपि शान्ते न स्यात्।

(६) चेष्टारहितेनाकिञ्ित्करेण शमप्रधानुपुरूषेण तत्त्वज्ञानोपायस्यानुष्ठानमपि न शक्यते कर्तुम्।

शान्तरस–स्थायिन आत्मज्ञानस्य स्थायिषु गणनाभावेऽपि रसेषु शान्तरसस्य गणना युक्तैव रत्यादीनामास्वादात् शान्तास्वादस्य वैलक्षण्यात्। अत्रायमाशयः ''योगाश्चित्तवृत्तिनिरोधः'' ''तदा द्रष्टुः स्वरूपेऽवस्थानम्'', ''वृत्तिसारूप्यमितरत्र [4]'' इति योगसिद्धान्तानुसारेण लौकिकानुभक्षणे चित्तवृत्तिसारूप्याद् विशुद्धात्मस्वरूपस्य प्रतीतिर्न भवति। निर्विकल्पे समाधै विशुद्धात्मस्वरूपानुभूतिर्जायते। पुनश्च व्युत्थानकाले (समाध्यनन्तरम्) वृत्तिसारूप्यं भवति। अर्थात् चित्तवृत्तिकलुषिरूपेणैवात्मप्रतीतिर्भवति न तु वृत्तिशून्यरूपेण। अतः स्थायिभावरूपेण आत्मनो न पृथग्गणनम्। किन्तु शान्तरसे शुद्धात्मन आस्वादत् शान्तस्य पृथग्गणनं न्याय्यमेव। अत एव च 'अभिनवभारती'कारेण सिद्धान्तितम्–'तस्मादस्ति शान्तो रसः। तत्र सर्वरसानां शान्तप्राय एवास्वादो विषयेभ्यो– विपरिवृत्या, तन्मुख्यतालाभात्। केवलं वासनान्तरोपहित इति [5]।'' ''अयमेव (च शान्तरसः) स्वभावः [6]।'' अर्थात् शान्त एव प्रकृतिरसः अन्ये च विकृतयाः। अत एव च ''अस्य सर्वप्रकृतित्वमभिधाय (त्वाभिधानाय) पूव्रमभिधानमिति'' एवञ्च स्वमतं समर्थयता अभिनवगुप्तपादेन प्रोक्तम्,– ''इतिहास–पुराणकोशादौ च नवरसाः श्रूयन्ते। श्रीमत्सिद्धानतशास्त्रेष्वति। तथा चोक्तम्–

अष्टानामिह देवानां शृड्गरादीन् प्रदर्शयेत्।
मध्ये च देवदेवस्य शान्तं रूपं प्रकल्पयेत्९।

**निष्कर्षः**

अत एव च हेतोर्भरतमुनिना–

''मोक्षाध्यात्मनिमित्तस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
निःश्रेयसधर्मयुतः शान्तरसो नाम विज्ञेयः।।''

इत्यत्र 'मोक्षाध्यात्मनिमित्तः' इत्यनेन शान्तस्य विभावः, 'तत्त्वज्ञानार्थहेतुसंयुक्तः' इत्यनेन तत्स्थायी, 'निःश्रेयसधर्मयुतः' इत्यनेन तदनुभावश्च क्रमात् प्रदर्शिताः तथा 'स्वं स्वं निमित्तमासाद्य' इत्यादिपूर्वोक्तकारिकया शान्तस्य रसान्तरप्रकृतित्त्वमुपसंहृतम्।

**सन्दर्भाः**


1. तत्रैव षष्ठाध्याये 608–610 इति पृष्ठे।
2. तत्रैव प्रथमाध्याये108।
3. तत्रैव 611–612 इति पृष्ठे।
4. योगदर्शन 1, 1–3।
5. अभिनवभारत्याम् 635– तमे पृष्ठे।
6. तत्रैव 635– तमे पृष्ठे।